StudentBounty.com

नामांकाः Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 22

# S—71—Sanskrit (T.L.)

No. of Printed Pages — 11

## माध्यमिक परीक्षा, 2013
## SECONDARY EXAMINATION, 2013

## तृतीय भाषा — संस्कृतम्

समय : $3\frac{1}{4}$ ( सपाद होरात्रयम् )

अधिकतमांकाः 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

StudentBounty.com



1. अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत —

संसारे कस्यापि देशस्य समृद्धिः जनसंख्यानियमनेन एव सम्भवति । यदा देशे भोक्तॄणां संख्या स्वल्पीयसी भवति, तदा साधनानां बहुलतया सर्वत्र सम्पन्नता दृश्यते । परन्तु यदा उपभोक्तॄणां संख्या समधिका जायते, तदा साधनानां स्वल्पतया सर्वत्र अभावः अनुभूयते । जनानां मनस्सु अशान्तिः उत्पद्यते, देशस्य च अवनतिः भवति । अतः देशस्योन्नत्यै जनसंख्या-साधनयोः द्वयोः सन्तुलनम् अपेक्षितं भवति ।

(क) एकपदेन उत्तरत —

(i) देशस्य समृद्धिः केन प्रकारेण सम्भवति ? $\frac{1}{2}$

(ii) देशस्योन्नत्यै कयोः द्वयोः सन्तुलनम् अपेक्षितं भवति ? $\frac{1}{2}$

(ख) जनसंख्यावृद्ध्या देशे केषां स्वल्पतया सर्वत्र अभावः अनुभूयते ? ( पूर्णवाक्येन उत्तरत ) 1

(ग) निर्देशानुसारम् उत्तरत —

(i) 'भवति' इति पदं लोट् लकारे परिवर्त्य लिखत । $\frac{1}{2}$

(ii) 'देशस्योन्नत्यै' इति पदस्य सन्धि-विच्छेदं कृत्वा लिखत । $\frac{1}{2}$

(iii) "चेतः" इत्यस्य पदस्य पर्यायवाचिशब्दं लिखत । $\frac{1}{2}$

(iv) 'जनानां मनस्सु अशान्तिः उत्पद्यते' अत्र 'उत्पद्यते' पदस्य कर्तृपदं लिखत । $\frac{1}{2}$

StudentBounty.com



2. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानामुत्तराणि यथानिर्देशं लिख्यत —

अहो प्रात:कालम् । अतीव रमणीयं दृश्यम् । प्रात:काले वातावरणम् अतीव शुद्धं सौम्यं च भवति । सर्वत्र शीतलवायु: प्रवहति । सूर्य: उदेति । प्रभातं भवति । सूर्यस्य प्रकाश: सर्वत्र प्रसरति । उद्याने पुष्पाणि विकसन्ति । तेषु भ्रमरा: गुञ्जन्ति । खगा: गीतं गायन्ति । मनुष्या: उत्तिष्ठन्ति । ते सूर्यं नमन्ति । छात्रा: प्रात:काले सूर्योदयात् पूर्वं शयनं त्यजन्ति । ते ईश्वरं नमन्ति । स्वजननीजनकौ नमन्ति । स्नानं कुर्वन्ति । तदा प्रातराशं कृत्वा विद्यालयं गच्छन्ति । कृषका: क्षेत्राणि गच्छन्ति । गोपालका: दुग्धम् आनयन्ति । समाचारपत्रवाहका: समाचारपत्राणि वितरन्ति । धार्मिका: देवालयं गच्छन्ति । प्रात:काले शुद्ध–वातावरणे भ्रमणमपि अतीव हितकरं भवति । प्रात:काले केचन जना: भ्रमन्ति, केचन व्यायामं कुर्वन्ति, केचन क्रीडन्ति । इत्थं सर्वे मनुष्या: अस्मिन् समये स्वकीयकार्येषु संलग्ना: भवन्ति ।

(क) एकपदेन उत्तरत —

(i) प्रात:काले वातावरणं कीदृशं भवति ? $\frac{1}{2}$

(ii) खगा: गीतं कदा गायन्ति ? $\frac{1}{2}$

(iii) समाचारपत्राणि के वितरन्ति ? $\frac{1}{2}$

(iv) पुष्पाणि कुत्र विकसन्ति ? $\frac{1}{2}$

(ख) पूर्णवाक्येन उत्तरत —

(i) सर्वे जना: कदा स्वकीयकार्येषु संलग्ना: भवन्ति ? 1

(ii) छात्रा: सूर्योदयात् पूर्वं किं त्यजन्ति ? 1

(iii) गोपालका: प्रात: किं कुर्वन्ति ? 1

(ग) अस्य अनुच्छेदस्य उपयुक्तं शीर्षकं लिखत । 1

(घ) यथानिर्देशं प्रश्नान् उत्तरत —

(i) 'अस्मिन् समये' अत्र विशेषणपदं किम् अस्ति ? $\frac{1}{2}$

(ii) 'ते सूर्यं नमन्ति' अत्र 'ते' सर्वनामपदस्थाने संज्ञापदं लिखत । $\frac{1}{2}$

(iii) 'कृषका: क्षेत्रेषु गच्छन्ति' अत्र कर्तृपदं किम् अस्ति ? $\frac{1}{2}$

(iv) 'स्वजननीजनकौ ......... ' अत्र 'जननीजनकौ' इत्यस्मिन् पदे प्रयुक्त समासस्य नाम लिखत । $\frac{1}{2}$

StudentBounty.com



3. भवती अहमदाबाद-नगरस्य उमा नामक छात्रा अस्ति । भवत्याः सखीं प्रीतिं प्रति एकं पत्रं लिखतु यस्मिन् भवत्याः 'विद्यालये आयोजितस्य वार्षिकोत्सवस्य' वर्णनं स्यात् । 4

**अथवा**

भवती संयोगिता । स्वकीयां सखीं मञ्जुं प्रति 'स्वदिनचर्यायाः विषये' अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा लिखतु । $8 \times \frac{1}{2} = 4$

| |
|---|
| परीक्षा-भवनतः, मञ्जो, संध्यादिकं, कुशलिनी, संयोगिता, ज्ञातुम् , अध्ययनं, उत्तिष्ठामि । |

(i) ..................

तिथि 17. 03. 2013

प्रिय सखि (ii) ..................

अत्र कुशलं तत्रास्तु । आशासे भवती अपि (iii) .................. । अद्य चिरात् तव पत्रं प्राप्य अहं अतीव प्रसन्नास्मि । भवती मम दिनचर्यां (iv) .................. इच्छति । अतः लिखामि ।

अहम् अत्र पञ्चवादने ( प्रातः ) (v) ..................। सार्धषड्वादन पर्यन्तं स्नानं व्यायामं च करोमि । सप्तवादनतः (vi) .................. प्रचलति । दशवादने भोजनं कृत्वा विद्यालयं गच्छामि । सायं पञ्चवादने क्रीडामि । सायं सप्तवादने (vii) .................. कृत्वा भोजनं करोमि । रात्रौ दशवादनपर्यन्तं पठामि । इत्येवं मम दिनचर्या ।

शेषं कुशलम् ।

भवत्याः सखी

(viii) ................

StudentBounty.com



4. मञ्जूषातः उचितानि पदानि गृहीत्वा 'धूम्रपान-निवारणाय' इति विषये गुरुशिष्ययो
पूरयत — $8 \times \frac{}{2}$

| गन्तुम् , अस्य, तुभ्यं, धूम्रपानं, स्वास्थ्य, प्रेरणीयाः, मया, दुर्व्यसनस्य । |
|---|

सोहनः — गुरुवर ! अहं पश्यामि विद्यालये केचन छात्रा .................. कुर्वन्ति ।

गुरुः — वत्स ! धूम्रपानं .................. विनाशकमस्ति ।

सोहनः — गुरुवर ! कोऽस्य ................. निवारणोपायः ।

गुरुः — पुत्र ! जन-जागर्तिरेव ................ दुर्व्यसनस्य निवारणोपायः ।

सोहनः — गुरुवर ! ................ किं करणीयम् ?


गुरुः — त्वया छात्राः ................ यत् अस्माभिः धूम्रपानं न करणीयम् ।

सोहनः — गुरुवर ! एवमेव करोमि । अधुना अहं ................ इच्छामि ।

गुरुः — वत्स ! महत्त्वपूर्ण विषयोपरि वार्तां कर्तुं ................ धन्यवादं ददामि ।

5. अधः चित्रं दृष्ट्वा मञ्जूषायां प्रदत्त शब्दानां सहायतया 'पर्यावरण-प्रदूषणम्' इति विषयोपरि संस्कृते अष्टवाक्यानि लिखत — $8 \times \frac{1}{2} = 4$

| पर्यावरणम् , महानगरमध्ये, वाहनानि, धूमं मुञ्चति, दूषितं, ध्वनि-प्रदूषणं, वायुमण्डलं, शुचिः । |
|---|



**अथवा**

StudentBounty.com



अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा उत्तर पुस्तिकायाम् लिखत — $8 \times \frac{1}{2} = 4$

| |
|---|
| अतिमहत्त्वं, प्रतिष्ठां, कल्पलता, विद्यार्जनम् , धर्माधर्मं, सर्वधनं, पशुरेव, अभिलाषाः । |

विद्याधनं (i) ................. प्रधानमस्ति । विद्या एव मनुष्यस्य सर्वाः (ii) ................... पूर्यन्ते । विद्यया एव (iii) ................. परिज्ञानं भवति । अस्मिन् समये विद्यायाः (iv) ................. वर्तते । विद्याविहीनस्तु मानवः साक्षात् (v) ................. वर्तते । विद्यया एव मनुष्यः सर्वत्र (vi) ............................ प्राप्नोति । विद्या वस्तुतः (vii) ............... विद्यते । अतः अस्माभिः (viii) ................ अवश्यमेव करणीयम् ।

6. पाठ्यपुस्तकात् **द्वौ** श्लोकौ लिखत यौ अस्मिन् प्रश्नपत्रे न स्याताम् । 4

7. अधोलिखित पदेषु सन्धिविच्छेदं **अथवा** सन्धिं कृत्वा सन्धेः नामापि लिखत —

(i) द्वौ + एव 1

(ii) दिग्गजः 1

(iii) यशोदा । 1

8. अधोलिखित वाक्येषु रेखांकित समस्त पदानां विग्रहं **अथवा** विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत —

(i) मम पुत्रस्य नाम <u>घनश्यामः</u> अस्ति । 1

(ii) अहं <u>पार्वतीं च परमेश्वरं च</u> वन्दे । 1

(iii) इदं स्थानं <u>निर्जलम्</u> अस्ति । 1

9. कोष्ठकेषु प्रदत्तैः शब्दैः प्रकृति प्रत्ययानुसारं रिक्तस्थानपूर्तिः करणीया —

(i) मुनिः पुनरपि विशदी .................. अकथयत् । ( कृ + शतृ ) 1

(ii) इदं .............. जलं न अस्ति । ( पा + अनीयर् ) 1

(iii) मनुष्यः ............... प्राणी अस्ति । ( समाज + ठक् ) 1

(iv) .............. इयं बालिका । ( कुमार + ङीप् ) 1

StudentBounty.com



10. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत —

( एव, सहसा, वृथा, बिना )

(i) ..................... विदधीत न क्रियाम् । 1

(ii) क्रियां ..................... नरः अकर्मण्यः भवति । 1

(iii) कर्मणा ...................... नरः पूज्यते । 1

(iv) वयं ...................... समयं न यापयेम । 1

11. अधोलिखित वाक्यानां वाच्यपरिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत —


(i) सः प्रश्नं पृच्छति । 1

(ii) कृष्णेन कंसः दृश्यते । 1

(iii) त्वं कथं हससि ? 1

(iv) शिष्यैः गुरुः प्रणम्यते । 1

12. घटिकाचित्रं सहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करणीयम् —



(i) अहं ............... वादने शयनं त्यजामि । 1

(ii) तदनन्तरं प्रातः ................. वादने भ्रमणाय गच्छामि । 1

(iii) अनन्तरं स्नानादिकं कृत्वा प्रातः ................... वादने अध्ययनं प्रचलति । 1

13. (i) 'चतुर्णाम्' इति संख्या पदस्य स्वरचितवाक्ये प्रयोगः करणीयः । 1

(ii) 69 इति संख्यां संस्कृतभाषया शब्देषु लिखत । 1

StudentBounty.com



14. अधोलिखित वाक्य **द्वयं** शुद्धं कृत्वा लेखनीयम् —

(i) सः सुखं लभति । $\frac{1}{2}$

(ii) इयं पुस्तकं कस्य अस्ति ? $\frac{1}{2}$

15. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत —

अस्ति द्रविडेषु काञ्ची नाम नगरी । तस्यामनेककोटिसारः श्रेष्ठिपुत्रः शक्तिकुमारो नामासीत् । सोऽष्टादशवर्षदेशीयः चिन्तामापन्नः — 'नास्त्यदाराणाम् अननुगुणदाराणां वा सुखम् । तत्कथं नु गुणवद् विन्देयं कलत्रम् ।' स वस्त्रान्तपिनद्धशालिप्रस्थो दारग्रहणाय भुवमभ्रमत् । यां कामपि लक्षणवतीं कन्यां विलोक्य स पृच्छति — 'भद्रे ! शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नम् अस्मान् भोजयितुम् ? एवं कृते स हसितावधूतः गृहाद् गृहं प्रविश्याभ्रमत् ।

(क) एकपदेन उत्तरत —

(i) काञ्ची नाम नगरी कुत्र अस्ति ? $\frac{1}{2}$

(ii) शक्तिकुमारः कतिवर्षदेशीयः ? $\frac{1}{2}$

(ख) शक्तिकुमारः लक्षणवतीं कन्यां विलोक्य किं पृच्छति ? ( पूर्णवाक्येन उत्तरत ) 1

(ग) 'श्रेष्ठिपुत्रः शक्तिकुमारः' अत्र विशेषणपदं लिखत । 1

(घ) 'दारा' इति पदस्य गद्यांशात् पर्यायवाचिशब्दं लिखत । 1

(ङ) 'एवं कृते स ............ प्रविश्याभ्रमत्' अत्र 'अभ्रमत्' इति क्रियापदस्य कर्तृपदं लिखत । 1

StudentBounty.com



16. अधोलिखितं श्लोकं ( पद्यं ) पठित्वा प्रश्नान् उत्तरत —

रे रे चातक ! सावधान मनसा मित्र क्षणं श्रूयता-
मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥

(क) एकपदेन उत्तरत —

(i) के वृष्टिभिः वसुधां आर्द्रयन्ति ? $\frac{1}{2}$

(ii) कीदृशं वचः मा ब्रूहिः ? $\frac{1}{2}$

(ख) कविः कं सम्बोध्य श्लोकं कथयति ? ( पूर्णवाक्येन उत्तरत ) 1

(ग) 'नैतादृशाः' इति पदस्य सन्धि-विच्छेदं कृत्वा सन्धेः नामापि लिखत । 1

(घ) 'गर्जन्ति' इति क्रियापदस्य कर्तृपदं किम् ? 1

(ङ) 'पश्यसि' इति पदे मूलधातुः कः ? 1

17. अधोलिखितं नाट्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत —

चन्दनदासः — आर्य ! किं मे भयं दर्शयसि ? सन्तमपि गेहे अमात्यराक्षस्य गृहजनं न समर्पयामि, किं पुनरसन्तम् ।

चाणक्यः — चन्दनदास ! एष एव ते निश्चयः ।

चन्दनदासः — बाढम् , एष एव मे निश्चयः ।

चाणक्यः — ( स्वगतम् ) साधु ! चन्दनदास साधु ।

सुलभेष्वर्थलाभेषु परसंवेदने जने ।
क इदं दुष्करं कुर्यादिदानीं शिविना विना ॥

(क) एकपदेन उत्तरत —

(i) चन्दनदासः कस्य गृहजनं न समर्पयति ? $\frac{1}{2}$

(ii) अस्मिन् नाट्यांशे चन्दनदासस्य तुलना केन सह कृता ? $\frac{1}{2}$

(ख) 'किं मे भयं दर्शयसि' इति कः कं प्रति कथयति ? ( पूर्णवाक्येन उत्तरत ) 1

(ग) 'सन्तम्' इति पदस्य विलोमशब्दं लिखत । 1

(घ) 'आत्मगतम्' इति पदस्य पर्यायवाचिशब्दं लिखत । 1

(ङ) 'सुलभेष्वर्थलाभेषु' इति पदस्य सन्धि-विच्छेदं कृत्वा सन्धेः नामापि लिखत । 1

StudentBounty.com



18. ''नास्त्युद्यमसमो बन्धुः'' समभावसूक्तिमाध्यमेन इत्यस्य भावबोधनं सरलसंस्कृतभाषया लिखत । 2

19. एकेन राजहंसेन या शोभा सरसो भवेत् ।

न सा बकसहस्रेण परितस्तीरवासिना ॥

उपर्युक्त श्लोकस्यान्वयमाश्रित्य रिक्तस्थानानि पूरयत — $4 \times \frac{1}{2} = 2$

एकेन (i) ................... सरसः या (ii)................... भवेत् । परितः (iii)...................

बकसहस्रेण (iv)......................... ( शोभा ) न ( भवति ) ।

20. रेखांकित पदमाधृत्य प्रश्ननिर्माणं कुरुत —

(i) प्राणेभ्योऽपि प्रियः सुहृत् । 1

(ii) सरसः शोभा राजहंसेन भवति । 1

(iii) प्रकृत्याः सन्निधौ वास्तविकं सुखं विद्यते । 1

21. अधोलिखितानि वाक्यानि क्रमरहितानि । यथाक्रमं संयोजनं कृत्वा लिखत — $6 \times \frac{1}{2} = 3$

(i) परं सः पूर्णशान्तिं नालभत ।

(ii) अनन्तः एकस्मिन् वटवृक्षात् मूले सः महाबोधम् अलभत ।

(iii) महात्मा बुद्धः एकस्यां रात्रौ गृहं त्यक्त्वा निर्गतः ।

(iv) तदारभ्य सः बुद्धनाम्ना प्रख्यातः अभवत् ।

(v) स इतस्ततः वने अभ्रमत् ।

(vi) एकदा सः पञ्चमित्रैः सह षड्वर्ष पर्यन्तम् अतपत् ।

StudentBounty.com



22. **'क' स्तम्भे** पदानि दत्तानि । **'ख' स्तम्भे** क्रमरहिताः तेषां समानार्थक शब्दाः दत्ता । उचितमेलनं कृत्वा लिखत — $6 \times \frac{1}{2} = 3$

| | **'क'** | **'ख'** |
|---|---|---|
| (i) | पर्याकुलम् | शान्तेः |
| (ii) | विशीर्णाः | क्रोधयुक्ताम् |
| (iii) | विदार्य | प्रकटयन्तः |
| (iv) | प्रकुपिताम् | परितः व्याकुलम् |
| (v) | उद्गिरन्तः | संत्रोट्य |
| (vi) | उपशमनस्य | नष्टाः |